नक्षत्रवाचिनः [1]शब्दादुत्तरस्य सकारस्य वा एति सञ्ज्ञायामग[2]कारात् [3]मूर्धन्यो भवति। रोहिणीषेणः, रोहिणीसेनः। [4]भरणीषेणः, भरणीसेनः। अगकारात् इत्येव, शतभिषक्सेनः। अविहितलक्षणो मूर्धन्यः सुषामादिषु [5]द्रष्टव्यः॥

## ह्रस्वात्तादौ तद्धिते। (९९/१३२८)

[6]ह्रस्वादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति [7]तादौ तद्धिते परतः। तरप् तमप् तय त्व तल् त्यप्, एतानि प्रयोजयन्ति। तरप् – सर्पिष्टरम्। यजुष्टरम्। तमप् – सर्पिष्टमम्। यजुष्टमम्। तय – [8]चतुष्टये ब्राह्मणानां निकेताः। त्व – सर्पिष्ट्वम्। यजुष्ट्वम्। तल् – सर्पिष्टा। यजुष्टा। तस् – सर्पिष्टः। यजुष्टः। त्यप् – 'आविष्ट्यो वर्धते' (ऋ. १.९५.५)। ह्रस्वात् इति किम्? गीस्तरा। धूस्तरा। तादौ इति किम्? सर्पिस्साद् भवति। प्रत्ययसकारस्य 'सात् पदाद्योः' (८.३.१११/२१२३) इति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात्। तद्धिते इति किम्? सर्पिस्तरति।

[९४४] तिङन्तस्य प्रतिषेधो वक्तव्यः। (म. भा. ३.४४८)

भिन्द्युस्तराम्। [9]छिन्द्युस्तराम्॥

## निसस्तपतावनासेवने। (१००/२४०३)

निसः सकारस्य मूर्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे। आसेवनं पुनः पुनः करणम्। निष्टपति [10]सुवर्णम्। सकृदग्निं [11]स्पर्शयति इत्यर्थः। अनासेवने इति किम्? निस्तपति सुवर्णं सुवर्णकारः। पुनः पुनरग्निं [12]स्पर्शयति इत्यर्थः। '[13]निष्टप्तं रक्षो निष्टप्ता अरातयः' (वा. सं. १. ७.) इत्यत्र सदप्यासेवनं न विवक्ष्यते। छान्दसो वा वर्णविकारः॥

## युष्मत्तत्ततक्षुःष्वन्तःपादम्। (१०१/३६४०)

युष्मत् तत् ततक्षुस् इत्येतेषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति, स चेत् सकारोऽन्तःपादं भवति[14]। युष्मदादेशाः त्वम्, त्वाम्, ते, तव। अग्निष्ट्वं नामासीत्[15]। त्वा – अग्निष्ट्वा वर्धयामसि। ते – अग्निष्टे (आप. गृ. ४. १०. १७) विश्वमानय। तव – 'अप्स्वग्ने सधिष्टव' (ऋ. ८. ४३. ९)। तत् – 'अग्निष्टद् [16]विश्वमापृणाति' (ऋ. १०. २. ४)। ततक्षुस् -- 'द्यावापृथिवी निष्टतक्षुः' (ऋ. १०. ३१. ७)। अन्तःपादम् इति किम्? 'यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विच :' (तै. ३. २. ५. ४)॥

## यजुष्येकेषाम्। (१०२/३६४१)

यजुषि विषये युष्मत्तत्ततक्षुःषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति। अर्चिभिष्ट्वम्, अर्चिभिस्त्वम्। अग्निष्टेऽग्रम्, 'अग्निस्तेऽग्रम्' (तै. ३.५.६.२)। 'अग्निष्टत्' (तै.१.१.१४.५), 'अग्निस्तत्' (तै. ३.२.५.४)। अर्चिभिष्टतक्षुः, अर्चिभिस्ततक्षुः॥

---

1. शब्दादुत्तरस्य नास्ति ब. 2. अगात् ब. 3. मूर्धन्यादेशः ब. इ. 4. हरिणीसेनः हरिणीषेनः ह. 5. ज्ञेयः इ. 6. ह्रस्वाद् वर्णात् ब. क. इ. 7. तकारादौ क.इ. 8. चतुष्टयं ब्राह्मणानां निकेतम् ड. 9. छिन्द्युस्तराम् नास्ति इ. 10. सुवर्णम् नास्ति ब. इ. 11–12. स्पृशति ब. इ. ह. 13. निस्तप्तम्, निस्तप्ता इत्यधिकम् ड. 14. पादमध्ये चेद् भवति इत्यर्थः इत्यधिकम् क. 15. आसीः ब.ड. 16. विश्वमावृणोति क. ड.